७ – इकारान्तानाम् उकारान्तानां च अङ्गानाम् अजाद्यपित्सु समग्रं चिन्तनम्

इति + अस्ति → इत्यस्ति; लघु + अतः → लघ्वतः इति व्यवस्था | संस्कृतभाषायां यत्र कश्चन इक्–वर्णः अस्ति, परश्च कोऽपि अच्–वर्णः, तत्र अव्यवहित–स्थित्याम् इक्–स्थाने यण्–आदेशः भवति इति अस्माकं सामान्यनियमः | **इको यणचि** इति सूत्रम्; "इकः स्थाने यण् स्यादचि संहितायां विषये" इति प्रसिद्धा वृत्तिः | यण्–सन्धिः इति वदामः |

अतः इकारः प्राक्, परश्च कोऽपि स्वरः, संहितायां विषये इ–स्थाने यकारः | उकारः प्राक्, परे कोऽपि स्वरः, संहितायां विषये उ–स्थाने वकारः इति सामान्यम् | परन्तु धातु–विषये वार्ता भिन्ना भवति | तिङन्तपदस्य निर्माणावस्थायां सामान्यं भिन्नमिति | तत्र **इको यणचि** (६.१.७६) इति सूत्रं प्रबाध्य **अचि श्नुधातुभ्रुवां य्वोरियङुवङौ** (६.४.७७) इति सूत्रेण इयङ् उवङ् च सामान्यं भवति | अनेन सूत्रेण अजादिषु प्रत्ययेषु इकारान्तधातुरूपि–अङ्गस्य इकारस्य स्थाने इयङ्–आदेशः, उकारान्तधातुरूपि–अङ्गस्य च उकारस्य स्थाने उवङ्–आदेशः भवति | अयं सामान्यनियमः—परन्तु अपवादाः सन्ति, अपि च इकारान्तानां च उकारान्तानां च सूत्राणाम् आकृतिः भिन्ना, अतः जनानां कृते भ्रमात्मकः विषयः | तर्हि अत्र तस्य समग्रं चिन्तनं कुर्मः, येन विषयः पूर्णतया स्पष्टः स्यात् |

सूत्राणि

इ/ई प्रसङ्गे—

**अचि श्नुधातुभ्रुवां य्वोरियङुवङौ** (६.४.७७) = श्नुप्रत्ययान्ताङ्गस्य (स्वादिगणस्य अङ्गस्य यथा शक्नु, चिनु इत्यनयोः), इकारान्त–उकारान्तधातुरूपि–अङ्गस्य, भ्रू–प्रातिपदिकस्य च— एषाम् इकारस्य उकारस्य स्थाने क्रमेण इयङ् उवङ् च आदेशः भवति अजादि–प्रत्यये परे | श्नु–प्रसङ्गे **प्रत्ययग्रहणे तदन्ता ग्राह्याः** (परिभाषा #२३) इति परिभाषया तदन्तविधिः; अनेन यस्य अङ्गस्य अन्ते श्नु–प्रत्ययः स्यात्, तस्मात् इत्यर्थः | य्वोः इति विशेषणं "धातु" शब्दस्य एव यतोहि श्नुप्रत्ययान्ताङ्गम्, भ्रू प्रातिपदिकम् च उकारान्तः एव अतः तत्र इयङ् इत्यस्य प्रसक्तिः नास्ति | तर्हि 'धातु' इत्येव अवशिष्यते यस्य कृते य्वोः इति विशेषणं योग्यम् | **येन विधिस्तदन्तस्य** (१.१.७२) इत्यनेन यस्य धातोः अन्ते इकार–उकारः स्यात् इति अर्थः | श्नुश्च धातुश्च, भ्रुश्च तयोः इतरेतरद्वन्द्वः श्नुधातुभ्रुवः, तेषां श्नुधातुभ्रुवाम् | इश्च उश्च तयोः इतरेतरद्वन्द्वः यू, तयोः य्वोः | इयङ् च उवङ् च तयोः इतरेतरद्वन्द्वः, इयङुवङौ | अचि सप्तम्यन्तं, श्नुधातुभ्रुवां षष्ठ्यन्तं, य्वोः षष्ठ्यन्तम्, इयङुवङौ प्रथमान्तम्, अनेकपदमिदं सूत्रम् | **अङ्गस्य** (६.४.१) इत्यस्य अधिकारः | अनुवृत्ति–सहितसूत्रम्— **य्वोः श्नुधातुभ्रुवाम् अङ्गानां इयङुवङौ अचि** |

**इणो यण्** (६.४.८१) = इण्–धातोः यण्–आदेशः भवति अजादिप्रत्यये परे | इणः षष्ठ्यन्तं, यण् प्रथमान्तं, द्विपदमिदं सूत्रम् | **अचि श्नुधातुभ्रुवां य्वोरियङुवङौ** (६.४.७७) इत्यस्मात् **अचि** इत्यस्य अनुवृत्तिः | **अङ्गस्य** (६.४.१) इत्यस्य अधिकारः | अनुवृत्ति–सहितसूत्रम्— **इणः अङ्गस्य यण् अचि** |

**एरनेकाचोऽसंयोगपूर्वस्य** (६.४.८२) = असंयोगपूर्व–अनेकाच्–इकारान्ताङस्य यण्–आदेशो भवति अचि परे | **येन विधिस्तदन्तस्य** (१.१.७२) इत्यनेन तादृश–धातुः यस्य अन्ते इकारः (न तु केवलम् इकाररूप्यङ्गम्; **अलोऽन्त्यस्य** (१.१.५२) इत्यनेन अन्त्यस्य अल्–वर्णस्य यणादेशः (न तु पूर्णाङ्गस्य) | न एकम्, अनेकम्, अनेके एकाचः यस्मिन् सः अनेकाच् नञ्तत्पुरुषगर्भो बहुव्रीहिः, तस्य अनेकाचः | नास्ति संयोगः पूर्वे यस्य स असंयोगपूर्वः बहुव्रीहिः, तस्य असंयोगपूर्वस्य | एः षष्ठ्यन्तम्, अनेकाचः षष्ठ्यन्तम्, असंयोगपूर्वस्य षष्ठ्यन्तं, त्रिपदमिदं सूत्रम् | **इणो यण्** (६.४.८१) इत्यस्मात् **यण्** इत्यस्य अनुवृत्तिः | **अचि श्नुधातुभ्रुवां य्वोरियङुवङौ** (६.४.७७) इत्यस्मात् **अचि**, **धातोः** (विपरिणामेन षष्ठ्यन्तम्)

इत्यनयोः अनुवृत्तिः | **अङ्गस्य** (६.४.१) इत्यस्य अधिकारः | अनुवृत्ति-सहितसूत्रम्— **अनेकाचः असंयोगपूर्वस्य एः धातोः अङ्गस्य यण् अचि** |

उ/ऊ प्रसङ्गे—

**अचि श्नुधातुभ्रुवां य्वोरियङुवङौ** (६.४.७७) = श्नुप्रत्ययान्ताङ्गस्य (स्वादिगणस्य अङ्गस्य यथा शक्नु, चिनु इत्यनयोः), इकारान्त-उकारान्तधातुरूपि-अङ्गस्य, भ्रू-प्रातिपदिकस्य च— एषाम् इकारस्य उकारस्य स्थाने क्रमेण इयङ् उवङ् च आदेशः भवति अजादि-प्रत्यये परे | श्नु-प्रसङ्गे **प्रत्ययग्रहणे तदन्ता ग्राह्याः** (परिभाषा #२३) इति परिभाषया तदन्तविधिः; अनेन यस्य अङ्गस्य अन्ते श्नु-प्रत्ययः स्यात्, तस्मात् इत्यर्थः | य्वोः इति विशेषणं "धातु" शब्दस्य एव यतोहि श्नुप्रत्ययान्ताङ्गम्, भ्रू प्रातिपदिकम् च उकारान्तः एव अतः तत्र इयङ् इत्यस्य प्रसक्तिः नास्ति | तर्हि 'धातु' इत्येव अवशिष्यते यस्य कृते य्वोः इति विशेषणं योग्यम् | **येन विधिस्तदन्तस्य** (१.१.७२) इत्यनेन यस्य धातोः अन्ते इकार-उकारः स्यात् इति अर्थः | श्नुश्च धातुश्च, भ्रुश्च तयोः इतरेतरद्वन्द्वः श्नुधातुभ्रुवः, तेषां श्नुधातुभ्रुवाम् | इश्च उश्च तयोः इतरेतरद्वन्द्वः यू, तयोः य्वोः | इयङ् च उवङ् च तयोः इतरेतरद्वन्द्वः, इयङुवङौ | अचि सप्तम्यन्तं, श्नुधातुभ्रुवां षष्ठ्यन्तं, य्वोः षष्ठ्यन्तम्, इयङुवङौ प्रथमान्तम्, अनेकपदमिदं सूत्रम् | **अङ्गस्य** (६.४.१) इत्यस्य अधिकारः | अनुवृत्ति-सहितसूत्रम्— **य्वोः श्नुधातुभ्रुवाम् अङ्गानां इयङुवङौ अचि** |

**इको यणचि** (६.१.७७) = इकः स्थाने यण्-आदेशः स्यात् अचि परे संहितायां विषये | इकः यण् स्यात् असवर्णे अचि परे इति सूत्रस्य फलितः अर्थः इति ज्ञेयम् (सवर्णे अचि परे **अकः सवर्णे दीर्घः** (६.१.१०१) इत्येनेन यण् बाधितम्) | इकः षष्ठ्यन्तं, यण् प्रथमान्तं, अचि सप्तम्यन्तं, त्रिपदमिदं सूत्रम् | **संहितायाम्** (६.१.७१) इत्यस्य अधिकारः | अनुवृत्ति-सहितसूत्रम्— **इकः यण् अचि संहितायाम्** |

**हुश्नुवोः सार्वधातुके** (६.४.८७) = हु-धातुः च अनेकाच् श्नुप्रत्ययान्तम् अङ्गं च, तयोः, असंयोगपूर्वस्य अङ्गान्तस्य उकारस्य स्थाने यण्-आदेशः भवति अजादि-सार्वधातुकप्रत्यये परे | **स्थानेऽन्तरतमः** (१.१.५०) इत्यनेन उकारस्य स्थाने, यण्-प्रत्याहारे स्थितेषु वर्णेषु वकारः चितः | **येन विधिस्तदन्तस्य** (१.१.७२) इत्यनेन तादृशम् अङ्गं यस्य अन्ते उकारः अस्ति; **अलोऽन्त्यस्य** (१.१.५२) इत्यनेन अङ्गान्ते उकारस्य स्थाने आदेशः; **यस्मिन् विधिस्तदादावल्ग्रहणे** (१.१.७२, वार्तिकम् २९) इत्यनेन अचि इत्युक्तौ अजादि-प्रत्यये | हुश्च श्नुश्च तयोरितरेतरद्वन्द्वः हुश्नुवौ, तयोः हुश्नुवोः | न विद्यते पूर्वः संयोगः यस्मात्, सः असंयोगपूर्वः बहुव्रीहिः, तस्य असंयोगपूर्वस्य | हुश्नुवोः षष्ठ्यन्तं, सार्वधातुके सप्तम्यन्तं, द्विपदमिदं सूत्रम् | **अचि श्नुधातुभ्रुवां य्वोरियङुवङौ** (६.४.७७) इत्यस्मात् **अचि** इत्यस्य अनुवृत्तिः; **इणो यण्** (६.४.८१) इत्यस्मात् **यण्** इत्यस्य अनुवृत्तिः; **एरनेकाचोऽसंयोगपूर्वस्य** (६.४.८२) इत्यस्मात् **अनेकाचः**, **असंयोगपूर्वस्य** इत्यनयोः अनुवृत्तिः; **ओः सुपि** (६.४.८३) इत्यस्मात् **ओः** इत्यस्य अनुवृत्तिः | **अङ्गस्य** (६.४.१) इत्यस्य अधिकारः | अनुवृत्ति-सहितसूत्रम्— **अनेकाचः हुश्नुवोः असंयोगपूर्वस्य ओः अङ्गस्य यण् अचि सार्वधातुके** |

इ / ई

अजादि किति ङिति परे

| एकाच् | | अनेकाच् | |
|---|---|---|---|
| सामान्यम् = इयङ् | अपवादः = यण् | सामान्यम् = इयङ् | अपवादः = यण् |
| इकारान्तधातवः | अदादिगणे इण्–धातुः | इकारान्तधातवः | इकारान्तधातवः |
| अङ्गम् एकाच् | अङ्गम् एकाच् | अङ्गम् अनेकाच् | अङ्गम् अनेकाच् |
| उदा— | इ + अन्ति → यन्ति | संयोगपूर्वः इकारः | असंयोगपूर्वः इकारः |
| तुदादिगणे रि–धातुः | **इणो यण्** (६.४.८१) | उदा— | उदा— |
| रि + अ + ति → रियति | | जुहोत्यादिगणे ह्री–धातुः | जुहोत्यादिगणे |
| अदादिगणे वी–धातुः | | जिह्री + अति → | भी–धातुः |
| वी + अन्ति → व् + इय् + अन्ति → वियन्ति | | जिह्र् + इय् + अति → जिह्रियति | बिभी + अति → |
| **अचि श्नुधातुभ्रुवां य्वोरियङुवङौ** (६.४.७७) | | **अचि श्नुधातुभ्रुवां य्वोरियङुवङौ** | बिभ् + य् + अति → बिभ्यति |
| | | | **एरनेकाचोऽसंयोगपूर्वस्य** |

सामान्यम्

**अचि श्नुधातुभ्रुवां य्वोरियङुवङौ** (६.४.७७)

अपवादः

**इणो यण्** (६.४.८१)

**एरनेकाचोऽसंयोगपूर्वस्य** (६.४.८२)

एकाच् सामान्यशास्त्रम्

इकारान्तधातुषु ईकारान्तधातुषु च सर्वप्रथमं भागद्वयं करणीयम् अङ्गम् एकाच् अनेकाच् वा इति | अच् इति स्वरः, एक एव स्वरः यस्मिन् इति एकाच्, अनेके अचः यस्मिन् इति अनेकाच् | इकारान्तेषु एकाच्–धातुषु इयङ्–आदेशो भवति अजाद्यपिति प्रसङ्गे; **अचि श्नुधातुभ्रुवां य्वोरियङुवङौ** (६.४.७७) इति सूत्रम् |

अदादिगणे वी + अन्ति → **अचि श्नुधातुभ्रुवां य्वोरियङुवङौ** (६.४.७७) इत्यनेन इयङ् → व् + इय् + अन्ति → वियन्ति

एकाच् विशेषशास्त्रम्

केवलम् एक एव अपवादः—इण् गतौ | अजाद्यपिति प्रसङ्गे इण्–धातोः यण्–आदेशो भवति, **इणो यण्** (६.४.८१) इति सूत्रेण |

अदादिगणे इण्–गतौ → इ + अन्ति → **इणो यण्** (६.४.८१) इत्यनेन यण् → यन्ति

अनेकाच् सामान्यशास्त्रम्

इकारान्तधातोः अङ्गम् अनेकाच् अस्ति चेत्, सः इकारः संयोगपूर्वो वा असंयोगपूर्वो वा इति द्रष्टव्यम् | इकारः संयोगपूर्वः चेत्, अजाद्यपिति प्रसङ्गे इयङ्–आदेशो भवति | अयं सामान्यनियमः, सूत्रम् **अचि श्नुधातुभ्रुवां य्वोरियङुवङौ** (६.४.७७) | उदाहरणार्थं जुहोत्यादिगणे जिह्री, यङ्–लुकि पेप्री, शेश्रि, चेक्री च |

जुहोत्यादिगणे ह्री–धातुः → जिह्री + अति → **अचि श्नुधातुभ्रुवां य्वोरियङुवङौ** (६.४.७७) इत्यनेन इयङ् → जिह्र् + इय् + अति → जिह्रियति

अनेकाच् विशेषशास्त्रम्

असंयोगपूर्वः इकारान्तधातुः चेत्, **एरनेकाचोऽसंयोगपूर्वस्य** (६.४.८२) इति सूत्रेण यण् विधीयते | उदाहरणानि यथा जुहोत्यादिगणे बिभी, चिकि; यङ्–लुकि यथा नेनी इत्यादीनि अङ्गानि |

जुहोत्यादिगणे कि → चिकि + अति → **एरनेकाचोऽसंयोगपूर्वस्य** (६.४.८२) इत्यनेन असंयोगपूर्वे यण् → चिक् + य् + अति → चिक्यति

वस्तुतः धातोः इकारः असंयोगपूर्वः चेदपि **अचि श्नुधातुभ्रुवां य्वोरियङुवङौ** (६.४.७७) इत्यस्य प्रसक्तिः अस्ति | किन्तु तत्र **एरनेकाचोऽसंयोगपूर्वस्य** (६.४.८२) इति तत् सूत्रं प्रबाध्य यण् विदधाति |

बाध्यबाधकभावः

अजादिषु कित्–ङित्–प्रत्ययेषु परेषु इवर्णान्तधातुरूपि–अङ्गे, आरम्भतः कथं कार्यं सिध्यति इति चेत् बाध्यबाधकभावः द्रष्टव्यः | यथा—

तुदादिगणे रि + अ → **इको यणचि** (६.१.७७) इत्यनेन यण् → **सार्वधातुकार्धधातुकयोः** (७.३.८४) इत्यनेन गुणः → **सार्वधातुकमपित्** (१.२.४), **क्क्ङिति च** (१.१.५) इत्याभ्यां गुणनिषेधः → **अचि श्नुधातुभ्रुवां य्वोरियङुवङौ** (६.४.७७) इत्यनेन इयङ् → र् + इय् + अ + ति → रियति

अदादिगणे इण्–गतौ इ + अन्ति → **इको यणचि** (६.१.७७) इत्यनेन यण् → **सार्वधातुकार्धधातुकयोः** (७.३.८४) इत्यनेन गुणः → **सार्वधातुकमपित्** (१.२.४), **क्क्ङिति च** (१.१.५) इत्याभ्यां गुणनिषेधः → **अचि श्नुधातुभ्रुवां य्वोरियङुवङौ** (६.४.७७) इत्यनेन इयङ् → **इणो यण्** (६.४.८१) इत्यनेन यण् → यन्ति

जुहोत्यादिगणे भी–धातुः बिभी + अति → **इको यणचि** (६.१.७७) इत्यनेन यण् → **सार्वधातुकार्धधातुकयोः** (७.३.८४) इत्यनेन गुणः → **सार्वधातुकमपित्** (१.२.४), **क्क्ङिति च** (१.१.५) इत्याभ्यां गुणनिषेधः → **अचि श्नुधातुभ्रुवां य्वोरियङुवङौ** (६.४.७७) इत्यनेन इयङ् → **एरनेकाचोऽसंयोगपूर्वस्य** (६.४.८२) इत्यनेन यण् → बिभ् + य् + अति → बिभ्यति

उ / ऊ

अजादि किति ङिति परे

| सामान्यम् = उवङ् | सामान्यम् = उवङ् | अपवादः = यण् | अपवादः = यण् | सर्वसामान्यम् = यण् |
|---|---|---|---|---|
| उकारान्तधातवः | संयोगपूर्वं श्नुप्रत्ययान्ताङ्गम् | हु-धातुः | असंयोगपूर्वं श्नुप्रत्ययान्ताङ्गम् | श्नुं विहाय प्रत्ययसहितम् |
| उदा— | उदा— | जुहु + अति → | उदा— | उकारान्तम् अङ्गम् |
| अदादिगणे यु-धातुः | शक् + श्नु → शक्नु | जुह् + व् + अति | चि + श्नु → चिनु | उदा— |
| यु + अन्ति → | शक्नु + अन्ति → | → जुह्वति | चिनु + अन्ति → | तनादिगणे |
| य् + उव् + अन्ति → | शक्न् + उव् + अन्ति → | **हुश्नुवोः सार्वधातुके** | चिन् + व् + अन्ति → | तन् + उ → तनु |
| युवन्ति | शक्नुवन्ति | | चिन्वन्ति | तनु + अन्ति → |
| **अचि श्नुधातुभ्रुवां य्वोरियङुवङौ** (६.४.७७) | | | **हुश्नुवोः सार्वधातुके** | तन् + व् + अन्ति → |
| | | | | तन्वन्ति |
| | | | | **इको यणचि** |

सामान्यम्
**अचि श्नुधातुभ्रुवां य्वोरियङुवङौ** (६.४.७७)
अपवादः
**हुश्नुवोः सार्वधातुके** (६.४.८७)
सर्वसामान्यम्
**इको यणचि** (६.१.७७)

सामान्यशास्त्रम्

इकारान्तेभ्यः ईकारान्तेभ्यः च उकारान्तधातुषु ऊकारान्तधातुषु च क्रमः भिन्नः; अत्र सामान्यशास्त्रे एकाच्-अनेकाच् इत्यनुसृत्य विभजनं नास्ति | किन्तु आम्, इवर्णान्तेषु इयङ् इव, उकारान्तधातोः साक्षात् अजादि-कित्-ङित्-प्रत्ययेन सह सम्पर्कः भवति चेत्, उवङः प्रसङ्गः आयाति | सामान्यशास्त्रम् अस्ति **अचि श्नुधातुभ्रुवां य्वोरियङुवङौ** (६.४.७७) | यथा अदादिगणे विकरणप्रत्ययस्य लुक् भवति अतः धातोः साक्षात् तिङ्प्रत्ययेन सह सम्पर्कः | तिङ्प्रत्ययः अजाद्यपित् चेत्, उवङ्-आदेशः—

यु + अन्ति → य् + उव् + अन्ति → युवन्ति

पुनः अपरेषु गणेषु विकरणप्रत्ययः स्वयम् अजाद्यपित् चेत्, प्रसङ्गः आयाति—यथा तुदादिगणे विकरणप्रत्ययः श; अनुबन्धलोपे "अ" इति अजाद्यपित् अस्ति |

गु + श → गु + अ → ग् + उव् + अ → गुव → गुव + ति → गुवति

तुदादिगणे अन्ये उकारान्तधातवः तथैव—
ध्रु + अ → ध्रुव
कु + अ → कुव

नू + अ → नुव
धू + अ → धुव
सू + अ → सुव

तर्हि धातुः उकारान्तः चेत्, अजाद्यपित्-प्रत्ययेन सह सम्पर्कः चेत्, **अचि श्नुधातुभ्रुवां य्वोरियङुवङौ** (६.४.७७) इति सामान्यशास्त्रम् ।

पुनः अन्यप्रसङ्गः अस्ति यत्र सामान्यं प्रवर्तते—संयोगपूर्वं श्नुप्रत्ययान्ताङ्गम् । तत्रापि अजादौ किति ङिति प्रत्यये परे उवङ्-आदेशो विहितः ।

शक् + श्नु → शक्नु → शक्नु + अन्ति → शक्न् + उव् + अन्ति → शक्नुवन्ति

स्वादिगणे सर्वे हलन्तधातवः अपि तथा यतोहि धातु-श्नु इत्यनयोः मेलनेन संयोगः निष्पद्यते एव—

आप् + श्नु → आप्नु → आप्नु + अन्ति → आप् + उव् + अन्ति → आप्नुवन्ति
सघ् → सघ्नु → सघ्नुवन्ति
चम् → चम्नु → चम्नुवन्ति
अश् → अश्नुवन्ति
तृप् → तृप्नुवन्ति*

*तृप्-धातुः क्षुभ्नादिगणे अस्ति ।

**क्षुभ्नादिषु च** (८.४.३९) = क्षुभ्नादिगणे पठितानां शब्दानां नकारस्य स्थाने णकारादेशो न भवति । क्षुभ्ना आदिर्येषां ते क्षुभ्नादयः, तेषु क्षुभ्नादिषु । क्षुभ्नादिषु सप्तम्यन्तं, च अव्ययपदं, द्विपदमिदं सूत्रम् । **रषाभ्यां नो णः समानपदे** (८.४.१) इत्यस्मात् **नः**, **णः** इत्यनयोः अनुवृत्तिः । **न भाभूपूकमिगमिप्यायीवेपाम्** (८.४.३४) इत्यस्मात् **न** इत्यस्य अनुवृत्तिः । **तयोर्य्वावचि संहितायाम्** (८.२.१०८) इत्यस्मात् **संहितायाम्** इत्यस्य अधिकारः । अनुवृत्ति-सहितसूत्रम्— **क्षुभ्नादिषु च नः णः न संहितायाम्** ।

धेयं यत् **अचि श्नुधातुभ्रुवां य्वोरियङुवङौ** (६.४.७७) इति सूत्रेण एकमेव विकरणप्रत्ययान्तम् अङ्गं यस्य उवङ् भवति— सुवादिगणे श्नुप्रत्ययान्तम् अङ्गम् । तदतिरिच्य सर्वे *धातवः* एव, इकारान्ताः उकारान्ताः च ।

<u>विशेषशास्त्रम्</u>
अपवादभूतसूत्रम् एकमेव— **हुश्नुवोः सार्वधातुके** (६.४.८७) । अनेन उवङ्-स्थाने यण्-आदेशः ।

१) हु-धातुः उकारान्तः अपि च जुहोत्यादिगणे सन् साक्षात् तस्य अजादि-कित्-ङित्-प्रत्ययेन सह सम्पर्कः भवति, किन्तु अपवादभूतः अयं धातुः । अयं धातुः साक्षात् उक्तः सूत्रे— **हुश्नुवोः सार्वधातुके** (६.४.८७) इत्यनेन यण् । जुहु + अति → जुह् + व् + अति → जुह्वति ।

२) असंयोगपूर्वं श्नुप्रत्ययान्ताङ्गम् अस्ति चेत्, उवङ् प्रबाध्य **हुश्नुवोः सार्वधातुके** (६.४.८७) इति सूत्रेण यण् । स्वादिगणे यावन्तः अजन्तधातवः

सन्ति, ते सर्वे अस्यां श्रेण्याम् अन्तर्भूताः |

चि + श्नु → चिनु → चिनु + अन्ति → चिन् + व् + अन्ति → चिन्वन्ति
रि + श्नु → रिणु → रिणु + अन्ति → रिण्वन्ति
सु + श्नु → सुनु → सुन्वन्ति
पृ + श्नु → पृणु → पृण्वन्ति

<u>सर्वसामान्यशास्त्रम्</u>
**इको यणचि** (६.१.७७)

अस्माभिः दृष्टं यत् यत्र कुत्रापि इकारान्तधातुरूपि–अङ्गात्, उकारान्तधातुरूपि–अङ्गात्, अथवा उकारान्ताविकरणप्रत्ययान्तात् अङ्गात् अजादि–कित्–ङित्–प्रत्ययः भवति, तत्र सदा **इको यणचि** (६.१.७७) आगत्य यण् विदधाति | किन्तु एतावता सर्वत्र **इको यणचि** इति सूत्रस्य कार्यं बाध्यते | सार्वधातुकलकारेषु एकस्मिन् एव स्थले एतादृश्यां स्थित्यां **इको यणचि** इत्यनेन यणः प्राप्तिः | तनादिगणे उ इति विकरणप्रत्ययः | अनेन प्रत्ययसहितम् उकारान्तम अङ्गं निष्पद्यते किन्तु श्नुप्रत्ययान्तम् अङ्गम नास्ति इति कारणतः **अचि श्नुधातुभ्रुवां य्वोरियङुवङौ** (६.४.७७) इत्यस्य प्रसक्तिः नास्त्येव | अतः तनादिगणे सर्वसामान्यशास्त्रेण यण्—

तन् + उ → तनु → तनु + अन्ति → तन् + व् + अन्ति → तन्वन्ति
क्षण् + उ → क्षणु → क्षण्वन्ति
सन् + उ → सनु → सन्वन्ति
मन् + उ → मनु → मन्वन्ति
वन् + उ → वनु → वन्वन्ति

सर्वसामान्यनियमः तु **इको यणचि** (६.१.७७) अस्ति इति स्मर्यताम् | इदं सूत्रं प्रबाध्य एव **अचि श्नुधातुभ्रुवां य्वोरियङुवङौ** (६.४.७७) कार्यं करोति | उवङ् विधीयते उकारान्तधातुः अस्ति चेत् अथवा श्नुप्रत्ययान्तम् अङ्गम् अस्ति चेत् | तन्–धातुः न उकारान्तधातुः, न वा तस्य अङ्गं श्नुप्रत्ययान्तम् | **इको यणचि** इत्यस्य प्रसक्तिः अस्ति यथा सर्वत्र अजादि–प्रत्यये परे; अत्र **अचि श्नुधातुभ्रुवां य्वोरियङुवङौ** इति सूत्रं न बाधते; अतः **इको यणचि** इत्यनेन एव यण्–आदेशो विहितः |

**अचि श्नुधातुभ्रुवां य्वोरियङुवङौ** (६.४.७७) इत्यस्य सार्वधातुकलकारेषु तर्हि आहत्य केषु धातुगणेषु प्रसक्तिः भवति ?

<u>तुदादिगणे</u>—
रि + अ → **अचि श्नुधातुभ्रुवां य्वोरियङुवङौ** (६.४.७७) इत्यनेन इयङ् → र् + इय् + अ + ति → रियति
गु + श → गु + अ → **अचि श्नुधातुभ्रुवां य्वोरियङुवङौ** (६.४.७७) इत्यनेन उवङ् → ग् + उव् + अ → गुव + ति → गुवति
<u>अदादिगणे</u>—
इङ् अध्ययने अधि + इ + अते → **अचि श्नुधातुभ्रुवां य्वोरियङुवङौ** (६.४.७७) इत्यनेन इयङ् → अधि + इय् + अते → अधीयते
यु + अन्ति → **अचि श्नुधातुभ्रुवां य्वोरियङुवङौ** (६.४.७७) इत्यनेन उवङ् → य् + उव् + अन्ति → युवन्ति

स्वादिगणे—

शक् + श्नु → शक्नु → शक्नु + अन्ति → **अचि श्नुधातुभ्रुवां य्वोरियङुवङौ** (६.४.७७) इत्यनेन उवङ् → शक्न् + उव् + अन्ति → शक्नुवन्ति

जुयोत्यादिगणे—

ह्री–धातुः → जिह्री + अति → **अचि श्नुधातुभ्रुवां य्वोरियङुवङौ** (६.४.७७) इत्यनेन इयङ् → जिह्र् + इय् + अति → जिह्रियति

एकः अन्तिमप्रश्नः उदेति— केचन उकारन्तधातवः सन्ति येषाम् उवङ्–आदेशो न दृश्यते एव सार्वधातुकलकारेषु | तत् किमर्थम् ? यथा भू–धातुः भ्वादिगणे, तस्य उवङ् प्रसङ्गः नैव आयाति सार्वधातुकलकारेषु | एतावता कारणं प्रायः जानन्ति—अत्र विकरणप्रत्ययः शप् पित् अस्ति; सार्वधातुकलकारेषु शप् सर्वदा आयाति, अतः धातोः साक्षात् अजादि–कित्–ङित्–प्रत्ययेन सह सम्पर्कः न कदापि भवति |

भू + शप् → भू + अ → भो + अ → भ् + अव् + अ → भव + अन्ति → भवन्ति |

अत्र भू, अन्ति इत्यनयोः साक्षात् सम्पर्कः नास्ति अतः उवङ्–आदेशस्य अवसरः न प्राप्यते | एवमेव भ्वादिगणे २६ अन्ये इकारान्ताः, ईकारान्ताः, उकारान्ताः, ऊकारान्ताः च धातवः सन्ति | भू–धातुरिव तेषाम् इगन्तस्य गुणः भवति, यस्मात् अजादि–कित्–ङित्–प्रत्ययेन सह सम्पर्कः न कदापि भवति |

परन्तु आर्धधातुकलकारेषु च आर्धधातुककृत्–प्रत्ययेषु च एषाम् इयङ् उवङ् इत्यनयोः अवसरः अर्हः | अग्रे गत्वा यदा आर्धधातुकप्रकरणं कृत्–प्रकरणं च कुर्मः, तदा द्रक्ष्यामः |

इति इकारान्तानाम् उकारान्तानां च धातूनाम् अङ्गानां च अजाद्यपित्सु समग्रं चिन्तनम् समाप्तम् |

Swarup – August 2013 (updated May 2016)